(ध्रुवपुत्रस्य श्लिष्टे: पुत्र:। यथा, हरिवंशे। २।१४-१५।
"तस्मात् श्लिष्टिञ्च भव्यञ्च ध्रुवात् शम्भुर्व्यजायत।
श्लिष्टेराधत्त सुच्छाया पञ्चपुत्रानकल्मषान्॥
रिपुं रिपुञ्जयं पुष्यं वृकलं वृकतेजसम्॥"
यदो: पुत्र:। यथा, भागवते। ९।२३।२०।
"यदो: सहस्रजित् क्रोष्टानलोरिपुरितिश्रुता:॥")

रिपुघातिनी, स्त्री, (रिपुं हन्तीति। हन+णिनि:।) लताविशेष:। कुपुइ इति भाषा। यथा,
"कुषिका बहुविस्तीर्णा कुषिका रिपुघातिनी॥"
इति शब्दचन्द्रिका॥

रिन्फ, प श वधे। इति कविकल्पद्रुम:॥ (तुदा०-पर०-सक०-सेट्।) नोपध:। प श, रिम्फति रिरिम्फ। सप्तमस्वरादिरयमित्यन्ये। इति दुर्गादास:॥

रिप्फं, क्ली, लग्नापेक्षया द्वादशराशि:। यथा,—
"कर्म्मस्थानञ्च दशमं स्वं मेषूरणमास्पदम्।
छिद्राख्यमष्टमं स्थानं रिप्फाख्यं द्वादशं स्मृतम्॥"
तत्र चिन्तनीयं यथा,—
"प्राप्तप्रायावथ चिन्तयेद्भवरिष्फे रिप्फेऽथ मन्त्रिव्ययौ
सौम्यस्वामियुतौ चितेरपचितिस्तेषां चतिस्त्वन्यथा॥"
इति ज्योतिस्तत्त्वम्॥

रिप्र:, त्रि, (रीङ् स्रवणे+"लीरीङोर्ह्रस्व: पुट् च तरौ श्लेषणकुत्सितयो:।" उणा०५।५५। इति रप्रत्यय:। धातोर्ह्रस्व:। प्रत्ययस्य पुट् च।) अधम:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥ (यथा, ऋग्वेदे। ६।७८।१।
"शुम्भाति रिप्रमविरस्य तान्वा।'
"रिप्रं अनुपादेयत्वेन पापरूपम्॥" इति तद्भाष्ये सायण:॥ क्ली, पापम्। यथा, ऋग्वेदे। १०।१७।१०।
"विश्वं हि रिप्रं प्रवहन्ति देवी:॥"
"देवीर्देव्य: देवनशीला आप: विश्वं सर्व्वं रिप्रं पापं प्रवहन्ति पुरुषसकाशात् प्रगमयन्ति अपनयन्तीति यावत्।" इति तद्भाष्ये सायण:॥)

रिप्रवाह:, त्रि, पापवाहक:। यथा,—
"क्रव्यादमग्निं प्रहिणोमि दूरम्।
यमराज्यं गच्छतु रिप्रवाह:॥"
इति भवदेवभट्टोक्तकुशण्डिकापद्धति:॥
"रिप्रं पापं वहतीति रिप्रवाह:।" इति तट्टीकायां गुणविष्णु:॥ "स प्रहित: क्रव्यादग्नि: यमराज्यं गच्छतु यमस्य राज्यं प्रति व्रजतु। किम्भूत: रिप्रवाह: रिप्रमिति पापनाम। रिप्रं पापं वहति नाशयति रिप्रवाह:।" इति वाजसनेयसंहिताभाष्ये महीधर:।३५।१९॥
"रिप्रवाह: रिप्रं पापं तस्य वोढ़ा सोऽग्नि: यमराज्ञ: यमो राजा येषां तान् यमराजकान् अन्यप्रदेशान् गच्छतु प्राप्नोतु।" इति ऋक्भाष्ये सायण:।१०।१६।९।)

रिफ, कुत्सने। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्। रिप्फ: रेफ:। इति दुर्गादास:॥

रिफ, श अर्पे। इति कविकल्पद्रुम:॥ (तुदा०-पर०-सक०-सेट्।) श, रिफति। अर्पो दानश्लाघाहिंसानिन्दायुद्धानि। इति दुर्गादास:॥

रिबि, इ गत्याम्। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिम्बति। इति दुर्गादास:॥

रिभ, रवे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-सेट्।) विरिभ्व:। इति दुर्गादास:॥

रिमेद:, पुं, अरिमेद:। इति राजनिर्घण्ट:॥

रिरी, स्त्री, पित्तल:। इति हेमचन्द्र:।४।११४॥

रिवि, इ व्रजे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिण्वति। व्रजो गति:। इति दुर्गादास:॥

रिश, औ श हिंसे। इति कविकल्पद्रुम:॥ (तुदा०-पर०-सक०-अनिट्।) औ, अरिक्षत्। श, रिशति। रेक्ष्यति। इति दुर्गादास:॥

रिश्य:, पुं, (रिश्यते हिंस्यते इति। रिश्+क्यप्।) मृग:। इति त्रिकाण्डशेष:॥

रिष, वधे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) रेषति। इति दुर्गादास:॥

रिषि:, पुं, ऋषि:। ऋषन्ति ज्ञानसंसारयो: पारं गच्छन्ति ऋषय:। ऋषी श गतौ नाम्नीति कि:। रिषिर्हिंसादिश्च। विद्याविदग्धमतयो रिषय: प्रसिद्धा:। इति प्रयोगात्। स्त्रियां ऋषी च। इत्यमरटीकायां भरत:॥

रिष्टं, क्ली, (रिष्+क्त:।) क्षेमम्। कल्याणम्। अशुभम्। अमङ्गलम्। (यथा, मार्कण्डेये। ५०।८९।
"स्थालीपिधाने यत्राग्निर्दत्तो दर्व्वीमुखेन वा।
गृहे तत्र हि रिष्टानामशेषाणां समाश्रय:॥")
अभाव:। नाश:। इत्यमरभरतौ॥ अशुभस्याभाव:। इति केचित्। इति भरत:॥ पापम्। इत्यजय:॥ तद्वति, त्रि॥

रिष्ट:, पुं, (रिष्+क्त:।) खड्ग:। फेनिल:। स तु रक्तशिग्रु:। इति मेदिनी। टे, २७॥

रिष्टक:, पुं, (रिष्ट एव। स्वार्थे कन्।) रक्तशिग्रु:। इति शब्दरत्नावली॥

रिष्टि:, पुं, (रेषति हिनस्तीति। रिष्+क्तिच्।) खड्ग:। इति मेदिनी। टे, २७॥

रिष्टि:, स्त्री, (रिष्+क्तिन्।) अशुभम्। इति मेदिनी। टे, २७॥ शस्त्रभेद:। इति शब्दरत्नावली॥

रिष्य:, पुं, (रिष्यते इति। रिष्+क्यप्।) मृगविशेष:। यथा,—
"ऋष्य ऋश्यो रिश्यो रिष्य एष: स्यादेणकोऽपि च।"
इति शब्दरत्नावली॥

रिष्व:, त्रि, (रिष वधे+"सर्व्वनिघृष्वरिष्वेति।" उणा० १।१५३। इति वन्प्रत्ययेन साधु:।) वधक:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥

रिह, वधे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) रेहति। इति दुर्गादास:॥

री, ओ ङ य चरणे। इति कविकल्पद्रुम:॥ (दिवा०-आत्म०-अक०-अनिट्।) ओ, रीण:। ङ य, रीयते पय:। इति दुर्गादास:॥

री, श रवे। वधे। गतौ। इति कविकल्पद्रुम:॥ (क्र्या०-प०-पर०-अक०-सक० च-अनिट्।) श, रिणाति रीण: रिणि:। रव: शब्द:। तथा च कातन्त्रादौ री गतिरेषणयो:। रेषणं वृकध्वनिरिति रमानाथ:। रिणाति रेषते वृक:। इति शब्दार्थे भट्टमल्ल:। इति दुर्गादास:॥

री, स्त्री, (री+क्विप्।) गति:। इति शब्दरत्नावली॥ रव:। वध:। इति रीधात्वर्थदर्शनात्॥

रीण्या, स्त्री, घृणा। यथा। मोहो रीण्या जुगुप्सा च ह्रणीया ह्णीयर घृणेति वाचस्पति:। अयन्तु लज्जायां प्रसिद्ध: प्रमादात् घृणायां प्रयुक्त इति कश्चित्। इत्यमरटीकायां भरत:॥

रीठा, स्त्री, रीठाकरञ्ज:। इति राजनिर्घण्ट:॥

रीठाकरञ्ज:, पुं, स्वनामख्यातवृक्ष:। तत्पर्य्याय:। गुच्छक: २ गुच्छपुष्पक: ३ रीठा ४ गुच्छफल: ५ अरिष्ट: ६ मङ्गल्य: ७ कुम्भबीजक: ८ प्रकीर्य्य: ९ सोमवल्क: १० फेनिल: ११। अस्य फलगुणा:। तिक्तत्वम्। उष्णत्वम्। कटुत्वम्। स्निग्धत्वम्। वातकफकुष्ठकण्डूतिविषविस्फोटनाशित्वञ्च। इति राजनिर्घण्ट:॥

रीढ़क:, पुं, पृष्ठवंश:। इति हेमचन्द्र:।३।२६५॥

रीढ़ा, स्त्री, (रिह बन्धे+औणादिक: क्त:।) अवज्ञा। इत्यमर:।१।७।२३॥

रीणं, त्रि, (री+क्त:। ओदितश्चेति न:।) स्रुतजलादि। क्षरितम्। इत्यमर:।३।१।९२॥

रीति:, स्त्री, (री+क्विच् क्तिन् वा।) आरकूट:। (तत्पर्य्यायगुणा यथा,—
"पित्तलन्त्वारकूटं स्यादरी रीतिश्च कथ्यते।
राजरीतिर्ब्रह्मरीति: कपिला पिङ्गलापि च॥
रीतिरप्युपधातु: स्यात्ताम्रस्य यशदस्य च।
पित्तलस्य गुणा ज्ञेया: स्वयोनिसदृशा जनै:॥
संयोगजप्रभावेण तस्याप्यन्ये गुणा: स्मृता:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
प्रचार:। स्यन्द:। इत्यमर:।२।८।६७॥ ३।३।६८॥ लोहकिट्टम्। इति मेदिनी। ते, ५०॥ दग्धस्वर्णादिमलम्। इति धरणि:॥ सीमा। स्रवणम्। गति:। स्वभाव:। शेषस्य पर्य्याय:। रूपम् २ लक्षणम् ३ भाव: ४ आत्मा ५ प्रकृति: ६ सहज: ७ रूपतत्त्वम् ८ धर्म्म: ९ सर्ग: १० निसर्ग: ११ शीलम् १२ सतत्त्वम् १३ संसिद्धि: १४। इति हेमचन्द्र:॥ (यथा, कथासरित्सागरे।१४।६२।
"निशान्तखिलचक्राकरीतिच्छदो रसक्रम:॥"